भारत ।

श्रीभगवानुवाच ।

"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥
देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत ।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि॥"
इति श्रीभगवद्गीतायाम् २ अध्यायः ॥

शोकनाशः, पुं, (शोकस्य नाशो यस्मात् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

शोकहारी, स्त्री, (शोकं हरतीति । हृ + अण् । ङीष् ।) वनवर्व्वरिका । इति राजनिर्घण्टः ॥

शोकारिः, पुं, (शोकस्य अरिः ।) कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

शोचनं, क्ली, (शुच् + ल्युट् ।) शोकः । इति हेमचन्द्रः ॥ (शोचतीति । शुच शोके + "जुचङ्क्रम्यदन्द्रम्यसृगृधीति ।" ३ ।२।१५० । इति युच् । शोकशीले, त्रि ॥ )

शोचना, स्त्री, शोकोत्पादना । शोचि णिङन्तात् कनप्रत्ययान्तादातृप्रत्ययनिष्पन्ना । इति संक्षिप्तसारव्याकरणम् ॥

शोचिः, [स्] क्ली, (शोचत्यनेनेति । शुच + "अर्चिशुचिहुसृपीति ।" उणा० २।१०८। इति इसिः ।) प्रभा । इत्यमरः ॥ (यथा, भागवते ।३।१५।२६।
"तद्विश्वगुर्व्वधिकृतं भुवनैकवन्द्यं
दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥")

शोचिष्केशः, पुं, (शोचींषि केशा इव यस्य । नियतं समासेऽनुत्तरपदस्थस्येति षत्वम् ।) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ (क्वचित् वाच्यलिङ्गोऽपि । तथा, ऋग्वेदे । १ । ४५ । ६ ।
"शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ।"
"शोचिष्केशं दीप्तिरूपकेशोपेतम् ।" इति तद्भाष्ये सायणः ॥ )

शोचकः त्रि, अवरः । क्षुद्रः । इति शब्दमाला ॥

शोटीर्य्यं, क्ली, वीर्य्यम् । इति शब्दरत्नावली ॥

शोठः, त्रि, मूर्खः । अलसः । इति मेदिनी ॥ धूर्त्तः । नीचः । पापरतः । इति शब्दरत्नावली ॥

शोण, ऋ गतौ । वर्णे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-वर्णे अक०-सेट् ।) वर्णोऽत्र रक्तीभावः । शोणति सूर्य्यः सन्ध्यायाम् । इति दुर्गादासः ॥

शोणं, क्ली, (शोणतीति । शोण वर्णे + पचाद्यच् ।) सिन्दूरम् । रुधिरम् । इति राजनिर्घण्टः ॥

शोणः, पुं, (शोण वर्णे + अच् ।) रक्तोत्पलतुल्यवर्णः । तत्पर्य्यायः । कोकनदच्छविः २ । इत्यमरः ॥ रक्तोत्पलनिभः ३ । इति शब्दरत्नावली ॥ रक्तोत्पलाभः ४ । इति जटाधरः ॥ (यथा, भागवते । १ । ११ । २ ।
"स उच्चकाशे धवलोदरोदरो-
ऽप्युरुक्रमस्याधरशोणशोणिमा ॥")
नदविशेषः । तत्पर्य्यायः । हिरण्यवाहुः । इत्यमरः ॥ हिरण्यवाहः २ । इति भरतः ॥ स तु अमरकण्टकदेशात् पाटलिपुत्त्रे गङ्गायां मिलितः । तज्जलगुणाः । रुचिदत्वम् । सन्तापशोषापहत्वम् । पथ्यत्वम् । वह्निकरत्वम् । बलपौष्टाङ्गवृद्धिप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अग्निः । श्योनाकः । लोहिताश्वः । कोकनदच्छाये, त्रि । इति मेदिनी ॥ समुद्रविशेषः । इति धरणिः ॥ रक्तेक्षुः । श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (रक्तवर्णे, त्रि । यथा, कुमारे । १ । ७ ।
"न्यस्ताक्षरा धातुरसेन यत्र
भूर्ज्जत्वचः कुञ्जरबिन्दुशोणाः ॥")

शोणकः, पुं, (शोण एव । स्वार्थे कन् ।) श्योनाकवृक्षः । इत्यमरः ॥

शोणझिण्टिका, स्त्री, (शोणा रक्तवर्णा झिण्टिका ।) रक्तसैरेयः । इति राजनिर्घण्टः ॥

शोणझिण्टी, स्त्री, (शोणा रक्तवर्णा, झिण्टी ।) कुरुवकः । कण्टकिनी । इति राजनिर्घण्टः ॥

शोणपत्रः, पुं, (शोणवत् रक्तानि पत्राणि यस्य ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

शोणपद्मकं, क्ली, (शोणं रक्तवर्णं पद्मकम् ।) रक्तकमलम् । इति राजनिर्घण्टः ॥

शोणपुष्पकः, पुं, (शोणं पुष्पं यस्य । कन् ।) कोविदारः । इति राजनिर्घण्टः ॥

शोणपुष्पी, स्त्री, (शोणवत् पुष्पमस्याः । ङीष् ।) सिन्दूरपुष्पी । इति राजनिर्घण्टः ॥

शोणरत्नं, क्ली, (शोणं रक्तवर्णं रत्नम् ।) पद्मरागमणिः । इत्यमरः ॥

शोणा, स्त्री, (शोणो रक्तवर्णोऽस्त्यस्या इति । अच् । टाप् ।) शोणवर्णयुक्ता । इति जटाधरः ॥

शोणाकः, पुं, वृक्षविशेषः । शोणा इति ख्यातः । तत्पर्य्यायः । श्योनाकः २ शुकनासः ३ कट्वङ्गः ४ दीर्घवृन्तः ५ कुटन्नटः ६ अरलुः ७ स्वर्णवल्कलः ८ ध्वान्तशात्रवः ९ । इति शब्दमाला ॥ मण्डूकपर्णः १० पत्रोर्णः ११ नटः १२ कट्वङ्गः १३ टुण्टुकः १४ शोणकः १५ अरलः १६ । इत्यमरः ॥ स्योनाकः १७ अरटुः १८ । इति तट्टीका ॥

शोणितं, क्ली, (शोण वर्णे + क्तः ।) शोण + जातार्थे इतच् वा ।) रक्तम् । इत्यमरः ॥ (यथा, मनुः । ११ । २०८ ।
"शोणितं यावतः पांशून् संगृह्णाति महीतले ।
तावन्त्यब्दसहस्राणि तत्कर्त्ता नरके वसेत् ॥")
तस्योत्पत्तिर्गर्भस्थस्य पञ्चमे मासि भवति । इति सुखबोधः ॥ कुङ्कुमम् । इति राजनिर्घण्टः ॥

शोणितचन्दनं, क्ली, (शोणितवत् चन्दनम् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

शोणितपुरं, क्ली, (शोणिताख्यं पुरम् ।) बाणपुरम् । इति त्रिकाण्डशेषः ॥

शोणिताह्वयं, क्ली, (शोणितं आह्वयो यस्य ।) कुङ्कुमम् । इति रत्नमाला ॥

शोणितोत्पलं, क्ली, (शोणितवत् रक्तमुत्पलम् ।) रक्तोत्पलम् । इति केचित् ॥

शोणी, स्त्री, (शोण + "शोणात् प्राचाम् ।" ४ । १ । ४३ । इति ङीष् ।) रक्तोत्पलतुल्यवर्णा स्त्री । इति व्याकरणं जटाधरश्च ॥ (वडवा । इति काशिका ॥ )

शोणोपलः, पुं, (शोणो रक्तवर्ण उपलः ।) माणिक्यम् । इति राजनिर्घण्टः ॥

शोथः, पुं, (श्वयतीति । श्वि गतौ + बाहुलकात् थन् । इत्युणादिवृत्तौ उज्ज्वलः । २ । ४ ।) रोगविशेषः । तत्पर्य्यायः । शोफः २ श्वयथुः ३ । इत्यमरः ॥ शोथकः ४ । इति शब्दरत्नावली ॥

अथ शोथाधिकारः । तत्र शोथस्य विप्रकृष्टनिदानमाह ।
"शुद्ध्यामयाभक्तकृशादलानां
क्षाराम्लतीक्ष्णोष्णगुरूपसेवा ।
दध्याममृच्छाकविरोधिपिष्ट-
गरोपसृष्टान्ननिषेवणञ्च ॥
अर्शांस्यचेष्टा वपुषो ह्यशुद्धि-
र्मर्म्मोपघातो विषमा प्रसूतिः ।
मिथ्योपचारः प्रतिकर्म्मणाञ्च
निजस्य हेतुः श्वयथोः प्रदिष्टा ॥"
शुद्धिर्वमनविरेकादि । आमयाः पाण्डुरोगादयः । अभक्तं अभोजनम् । आमः अपक्वो भुक्तस्य रसः । पिष्टगरोपसृष्टान्नं पिष्टो यो गरः संयोगजं विषं तेन उपसृष्टमन्नम् । वपुषो ह्यशुद्धिः शोधनार्हस्य वपुषोऽशोधनम् । मर्म्मोपघातः दोषकृत एव ज्ञेयः । दाह्यहेतुजस्तु मर्म्मोपघातः आगन्तुजशोथहेतुरेव । विषमा प्रसूतिः आमगर्भपतनादिना । प्रतिकर्म्मणां वमनादीनां पञ्चकर्म्मणाम् । मिथ्योपचारः असम्यक्करणम् । श्वयथोः शोथस्य । निजस्य आत्मीयस्य । सन्निकृष्टस्य हेतोर्वातादेः । हेतुः रूक्षोष्णमधुरादि ॥ * ॥ सन्निकृष्टनिदानमाह ।
"दोषैः पृथक् द्वयैः सर्व्वैरभिघाताद्विषादपि ।
सर्व्वो हेतुविशेषैस्तु रूपभेदो नवात्मकः ॥" * ॥
संप्राप्तिपूर्व्वकं सामान्यं लक्षणमाह ।
"रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिःशिराः
नीत्वा रुद्धगतिस्तैर्हि कुर्य्यात् त्वङ्मांससंश्रयम्
उत्सेधं संहतं शोथं तमाहुर्निचयादतः ॥
सगौरवं स्यादनवस्थितत्वं
सोत्सेधमुष्माथ शिरातनुत्वम् ।
सलोमहर्षश्च विवर्णता च
सामान्यलिङ्गं श्वयथोः प्रदिष्टम् ॥"
उत्सेधः उन्नतत्वं किं विशिष्टमुत्सेधं अतः पूर्व्वोक्तान्निचयात् रक्तपित्तकफवातानां समुदायात् । संहतं घनम् । तमुत्सेधं शोथमाहुरित्यन्वयः ॥ * ॥ तत्र शोथस्य किं स्यादित्या-